# भागवतगीता

मथुरानगरे उग्रसेनः इति राजा आसीत्। तस्य कंसः इति पुत्रः, देवकी इति पुत्री च अभवताम्। कंसः क्रूरः, राक्षसगुणसहितश्च। सः भगिन्याः विवाहं वसुदेवेन सह अकारयत्। तौ दम्पती रथे उपवेश्य कंसः स्वयं रथं अचालयत्।

मध्येमार्गं, 'रे कंस! तव भगिन्याः अष्टमः गर्भः त्वां हनिष्यती' इति अशरीरिशब्दं कंसः अशृणोत्। एतत् श्रुत्वा कंसः भगिनीं, वसुदेवं च कारागृहे न्यक्षिपत्। देवक्याः पुत्रान् जातमात्रान् कंसः जघान। अष्टमगर्भे जातं पुत्रं वसुदेवः कंसभयात् नन्दगोपगृहं प्रापयति स्म। तत्र बलरामकृष्णौ अवर्धताम्। कंसः तौ हन्तुं राक्षसान् प्रैषयत्।

पूतनाशकटासुरप्रभृतीन् राक्षसान् सर्वान् रामकृष्णौ अमारयताम्।

श्रीकृष्णः स्वमातुलं कंसं अमारयत्।

पश्चात् शिशुपाल-दन्तवभ्रादीन् बहून् राक्षसांश्च अहनत्। श्रीकृष्णः रुक्मिणीसत्यभामादिकाः अनेकसहस्र संख्याकाः स्त्रियः उपयेमे।

सः पाण्डवानां साहाय्यं अकरोत्। सः अर्जुनस्य सारथ्यमपि अकरोत्। अर्जुनः भारतयुद्धे दुर्योधनादीन् बहून् दुष्टान् अमारयत्। एवं बहून् दुर्जनान् हत्वा भूभारं अहरत्।